# अध्याय :-६० Chapter-60

सूत उवाच ।।[१]
सोऽथ प्राग्ज्योतिषाद्बाह्ये महोपनवसंस्थितम् ।।
सहस्त्र[२]भूमिकं गेहमपश्यत हिरण्मयम् ।। १

वेणुवीणामृदंगानां निःस्वनैः परि[३]पूरितम् ।।
दश साहस्त्र[४] संख्याभिश्चेटीभिः परिपूरितम् ।। २

आयादभ्दिः प्रतियादभिश्च भगदत्तस्य किंकरैः ।।
किमिच्छन्तीति भगिनी पृच्छकैरभिपूरितम् ।। ३

तदासाद्य स हैडंबिर्मेरोः शिखरवद्गृहम् ।।
द्वारोपरि स्थितां संददर्श कर्णप्रावरणां सुखीम् ।। ४

तामाह ललितं वीरो भद्रे सा क्व मुरोः सुता ।।
कामुको द्रष्टुमिच्छामि दूरदेशागतोऽतिथिः ।। ५

कर्णप्रावरणोवाच ।।
किं तवास्ति महाबाहवे तया मौर्व्या प्रयोजनम् ।।
कोटिशो निहताः पूर्वं तथा[५] कामुक कामुकाः ।। ६

तव रूपमहं दृष्ट्वा घटहासं सदोत्कचम् ।।
प्रणम्य पादयोर्वीर स्थिता ते वचनंकरी ।। ७

---

१ अ. सूत ।। ब. सूत उ० ।।
२ अ भौमिकं
३ अ. पूरितं
४ ब. सहस्त्र
५ अ. मथा

तन्मया सह मोद्वस्व भुक्ष्व भोगांश्च कामुक[1] ।।
दास्याम्यनुचराणां ते त्रयाणां च प्रियात्रयम् ।। ८

घटोत्कच उवाच[2] ।।
कल्याणि[3] किंवदंती[4] ते प्रमुक्ता स्वोचिता शुभे[5] ।।
पुनर्नैतद्वचस्तुभ्यं विशते मम चेतसि ।। ९

वामः कामो यतो भद्रे यस्मिन्नुपनि बद्धयते ।।
स चात्र नैव बन्धाति तद्वयं किं प्रकुर्महे ।। १०

अद्य ते स्वामिनी दृष्टा जिता वा क्रीडते मया ।।
तया वा विजितो यास्ये पूर्वेषां कामिनां गतिम् ।। ११

कर्णप्रावरणो तस्माच्छीघ्रमेव निवेद्यताम् ।।
यथा दर्शनमात्रेण पूजयंत्यऽतिथिं खलु[6] ।। १२

इति भैमेर्वचः श्रुत्वा प्रस्खलंती निशाचरी ।।
प्रासाद शिखरस्थां तां मौर्वीऽमेवं वचोऽवदत् ।। १३

देवि कोऽपि युवा श्रीमांस्त्रैलोक्येष्वमित प्रभः ।।
कामातिथिस्तव द्वारि वर्तते दिश तत्परम् ।। १४

---

१ अ. कः
२ अ. प्रतौ 'उवाच' नास्ति ।
३ अ. कल्याण
४ ब. किं च दंति
५ अ. शुभे
६ ब. खला

कामकंटकटीवाच ।।
मुच्यतां[1] शीघ्रमेवासौ किमर्थं वा विलंबसे[2] ।।
कदाचिद्रैव संगत्या समयो मेऽभिपूर्यति ।। १५

इत्युक्तवचनाच्चेटी प्राप्यावोचद्धटोत्कचम् ।।
वज्र शीघ्रं कामुक त्वं तस्या मृत्योरिव सन्निधौ ।। १६

इत्युक्तः स प्रहस्यैव तत्रोत्सृज्य स्वकानुगान्[3] ।।
प्रविवेश गृहं [illegible] भैमिः सिंहो मेरुगुहामिव ।। १७

स पश्यन्छुक संधातान्पारावतगणां स्तथा ।।
सारिकाश्च मदोन्मत्ताश्चेटीस्तां चाप्यपश्यत् ।। १८

रूपेण वयसा चैव रतेरपि रितं करीम् ।।
आंदोलक[4]सुखासीनां सर्वाभरणभूषिताम् ।। १९

तां विद्युतमिवोन्नद्धां दृष्ट्वा भैमिरचिंतयत् ।।
अहो कृष्णेन पित्रा मे निर्दिष्टेयं ममोचिता ।। २०

न्यायूयमेतत्कृते पूर्वं नष्टा यत्कामिनां गणाः ।।
शरीरक्षयपर्याप्तं क्षीयते यदि कामिनाम् ।। २१

---

१ ब. उच्यतां
२ अ. विलंबयते
३ अ. स्वकान् गुणान् ।।
४ ब. आदौलक

कामिनीनां कृते श्रेष्ठं क्षीयते[1] गणनात्र का ।।
एवं बहुविधं कामी चिंतयन्नाह भीमभूः ।। २२

निष्ठुरे वज्रहृदये प्राप्तोऽहम तिथिस्तव ।।
किं उचितां तत्सतां पूजां कुरु या ते हृदि स्थिता ।। २३

इति हैडंबिवचनं श्रुत्वा कामकटंकटा ।।
विस्मिताऽभूत्तस्य रूपात्स्वं निनिंद च बालिशम् ।। २४

धिगहं यन्मया पूर्वं समयः स कृतोऽभवत्[2] ।।
न कृतोऽभूद्यदि पुरा अभविष्यदसौ पतिः ।। २५

इति संचिन्तयन्ती सा भैमिं वचनम् ब्रवीत् ।।
वृथा त्वमागतो भद्र जीवन्याहि पुनः सुखी ।। २६

अथ कामयसे मां त्वं तत्कथां शीघ्रमुच्चर ।।
कथामाभाष्य यदि मां सन्देहे पातयिष्यसि[3] ।।
ततोऽहं वशगा जाता हतो वा स्वप्स्यसे मया ।। २७

सूत उवाच ।।[4]
इत्युक्तवचनामेतां नेत्रोपांतेन वीक्ष्य सः ।। २८

---

१ अ. ब. 'क्षीयतां'
२ अ. भवान्
३ ब. ति ।।
४ अ. प्रतौ नास्ति । ब. किं सुत ।।

स्मृत्वा चराचरगुरुं कृष्णमारब्धवान्कथाम् ।।
कस्यांचिदभवत्पत्न्यां युवा कोऽप्य जितेंद्रियः ।। २९

तस्य चैका सुता जज्ञे भार्या तस्य मृताऽभवत् ।।
ततो बालकिकां पुत्रीं ररक्ष च पुपोष च ।। ३०

सा यदाभूद्यौवनगा व्यंजितावयवा शुभा[1] ।।
प्रोल्लसत्कुंचमध्यांगी प्रोल्लसन्मुखपंकजा ।। ३१

तदास्य काममुलितमालानं प्रजहौ मनः ।।
प्रोवाच तां च तनयां समालिंग्य दुराशयः ।। ३२

प्रातिवेश्मकपुत्री त्वं मयानीयात्र पोषिता ।।
भार्यार्थं सुचिरं कालं तत्कार्यं साधय प्रिये ।। ३३

इत्युक्ता सा च मेने च तत्तथैव वचस्तदा ।।
पतित्वेन च भेजे तं भार्यात्वेन स तां तथा ।। ३४

ततस्तस्यां सुता जज्ञे तस्मान्मदनरासभात् ।।
वद सा तस्य भवति किं दौहित्री सुताऽथवा ।।
एनं[2] प्रश्नं मम ब्रूहि शीघ्रं चेच्छक्तिरस्ति ते ।। ३५

---

१ अ. श्रुभा ।।
२ अ. ब. 'एवं'

सूत उवाच ।।[१]
इति प्रश्नं सा च श्रुत्वाचिंतयद्बहुधा त्ददि ।। ३६

न च पश्यति निर्द्धारं प्रश्नस्यास्य कथंचन ।।
ततः प्रश्नेन विजिता स्वांशक्तिं समुपाददे ।। ३७

अताडयुद्रुकमरज्जुं कराभ्यां दौलकस्य च ।।
ततो रक्षांसि निष्पेतुः कोटिशो भीषणान्यति ।। ३८

सिंहव्याघ्र वराहाश्च महिषाश्चिकाक्रका मृगाः ।।
समीक्ष्य तान संख्येयान् खादितुं धावतोरुष्का ।। ३९

अवादयन्नरवो भैमिः कनिष्ठां[२] गुष्ठजो[३] हसन् ।।
ततो ~~क्रि~~- विनिः[४] सृतास्तत्र द्विगुणा राक्षसादयः ।। ४०

तैमौ~~र्व~~ निर्मिताः सर्वे क्षणादेवस्म भक्षिताः ।।
विजितायां स्वशक्तो च बलशक्तिमथाददे ।। ४१

उत्थाय सहसा दौलात्खड्गमादातुमैच्छत ।।
उत्तिष्ठंती च तां भैमिरनुसृत्य जयादिव ।। ४२

---

१ अ. ब. हस्तप्रतिषु इत्ययं पाठः नास्ति ।
२ अ. कनिष्टां
३ अ. गुष्टजो
४ ब. विनि

केशेष्वादाय सव्येन पाणिना/पातयद्भुवि ।।
ततः कंठे सव्यपादं दत्त्वादाय च कर्तिकाम् ।। ४३

दक्षिणेन करेणास्याश्छेत्तुमिच्छत नासिकम् ।।
विस्फुरंती ततो मौर्वी मंददाह घटोत्कचम् ।। ४४

प्रश्नेन शक्त्या च बलेन नाथ त्रिधा त्वयाहं विजिता नमस्ते ।।
तन्मुंच[1] मां कर्मकरी तवास्मि समादिश त्वं[2] प्रकरोमि तच्च ।। ४५

घटोत्कच उवाच[3] ।।
यद्येवं तर्हि मुक्तासि भूयो दर्शय यद्बलम् ।।
एवमुक्तवा मुमोचैनां मुक्ता चाह प्रणम्य सा ।। ४६

जानामि त्वां महाबाहो वीरं शक्तिमतां वरम् ।।
सर्व राक्षस भर्तारं त्रैलोक्येऽमित विक्रमम् ।। ४७

गुह्य काधिपतिस्त्वं हि कालनाम इति स्मृतः ।।
षष्टि कोटि पतिर्जातो [4]यक्षरक्षाकृते भुवि ।। ४८

इति मां प्राह कामाख्या सर्वं तत्संस्मराम्यहम् ।।
इदं गेहं सानुगं मे दत्तं मयात्मना तव ।। ४९

---

१ ब. तन्मुखं
२ 'त्वं' ब. प्रतौ नास्ति ।
३ अ. प्रतौ 'उवाच' नास्ति ।
४ ब. जयरक्षा

४५१

समादिश प्राणनाथ कमादेशं करोमि ते ।।
घटोत्कच उवाच[१] ।।
प्रच्छन्नस्तस्य घटते न विवाहः कथंचन ।। ५०

मौर्वि यस्य हि वर्तते पितरौ बांधवास्तथा ।।
तन्मां शीघ्रं वह शुभे[२] शक्रप्रस्थाय संप्रति ।। ५१

अयं कुल क्रमोऽस्माकं यद्भार्या पतिमुद्वहेत् ।।
तत्रानुज्ञां समासाद्य परिणेष्यामि त्वामहम् ।। ५२

भगदत्तमथो नार्थं ततो मौर्वीन्यवदयत् ।।
समादाय बहुद्रव्यं विससर्जाथ भ्रातरम् ।। ५३

ततः पृष्ठिं[३] समारोप्य घटोत्कचमनिंदिता ।।
नानाद्रव्य परीवारा शक्रप्रस्थं समाव्रजत् ।। ५४

ततोऽसौ वासुदेवेन पांडवैश्चाभिनंदितः ।।
शुभे लग्ने पाणिमस्या जगृहे भीमनंदनः ।। ५५

कुरुणां राक्षसानां च प्रोक्तोत्तमविधातः ।।
उद्वाह्य तां तद्धनैश्च तर्पयामास पांडवान् ।। ५६

---

१ ब. प्रती 'उवाच' नास्ति ।
२ अ. श्रुभे
३ अ. पृष्टिं

कुंती च द्रौपदी चोभे मुमुदाते नितांततः[1] ।।
मंगलान्यस्य चक्राते मौर्व्याश्चैव धन तर्पिते ।। ५७

ततो विवाहे निर्वृते प्रतिपूज्य घटोत्कचम् ।।
भार्यया सहितं राजा स्वराज्याय समादिशत् ।। ५८

मौर्व्याज्ञां शिरसा गृह्य हैडंबिभार्ययान्वितः ।।
शुभं[2] हिडम्बस्य वने[3] स्वराज्यं[4] समुपाक्रमीत् ।। ५९

ततो राक्षसयोषाभिर्वीर कांस्यैः प्रवर्धितः ।।
महोत्सवेन महता स्वराज्ये प्रमुमोदसः ।। ६०

ततो वनेषु चित्रेषु निम्नगापुलिनेषु च ।।
रेमे[5] सह तया भैमिर्मदादर्येव रावणः ।। ६१

एवं विक्रीडतस्तस्य गर्भो जज्ञे महाद्युतिः[6]
हैडंबे राक्षसव्याघ्राद्बालसूर्यसमप्रभः ।। ६२

स जातमात्रो ववृधे क्षणाद्यौवनगोभवत् ।।
नीलमेघचयप्रख्यो घटास्यो दीर्घलोचनः ।। ६३

---

१ अ. नितांनिष्ठे च ।।
२ अ. शुभं
३ अ. वनं ब. वचनं
४ ब. स राज्यं
५ ब. रामे
६ ब. तिः

ऊर्ध्वकेशश्चोर्ध्वरोमा पितरौ[1] प्रणतोऽब्रवीत् ।।
प्रणमामि युवां चोभौ जातस्य पितरौ गुरू ।। ६४

भवतोर्हि प्रियं कृत्वा अनृणः स्यां सदा ह्यहम्[2] ।।
भवद्भ्यां दत्तमिच्छामि अभिधानं [3]यथात्मनः ।। ६५

अतः परं तु[4] यच्छ्रेयः कर्तव्यं प्रोन्नति प्रदम् ।।
ततो भैमिस्तमालिंग्य पुत्रं वचनमब्रवीत् ।। ६६

बर्बराकारकेशत्वाद्बर्बरीकाभिधो भवान्[5] ।।
भविष्यति महाबाहो कुलस्यानन्ददर्धनः ।। ६७

श्रेयश्च ते यत्परमं द्रढं च तत्कीर्त्यते बहुधा विप्रमुख्यैः ।।
प्रक्ष्यावहे तद्यदुवंशनाथं गत्वा पुरीं[6]द्वारकां वासुदेवम् ।। ६८

*७ इति श्री स्कांदे.....बर्बरीकोत्पत्ति वर्णनं नाम षष्टितमोऽध्यायः ।।

---

१ ब. पितरौ
२ अ. प्रतौ 'भवे' पाठः
३ अ. तथा
४ अ 'च' पाठः ।
५ अ. महान्
६ ब. पुरी
*७ अ. इति कुमारिका खंड ।।
ब. इति स्कंद पुराणे कु० नवपंचशोऽध्यायः ।।
(Again it is mentioned in the M.S.S.-B-The chapter 59)